# MudgalaUpanishad

# મુદ્ગલોપનિષત્

## Document Information

Text title : Mudgala Upanishad

File name : mudgala.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 57 / 108; Rig Veda - Samanya upanishad

Latest update : Mar. 21, 2000

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# મુદ્ગલોપનિષત્

શ્રીમત્પુરુષસૂક્તાર્થં પૂર્ણાનન્દકલેવરમ્ ।
પુરુષોત્તમવિખ્યાતં પૂર્ણં બ્રહ્મ ભવામ્યહમ્ ॥

ૐ વાઙ્ મે મનસિ પ્રતિષ્ઠિતા
મનો મે વાચિ પ્રતિષ્ઠિતમાવિરાવીર્મ એધિ ॥

વેદસ્ય મ આણીસ્થઃ । શ્રુતં મે મા પ્રહાસીરનેનાધીતે-
નાહોરાત્રાન્સન્દધામ્યૃતં વદિષ્યામિ સત્યં વદિષ્યામિ ॥

તન્મામવતુ તદ્વક્તારમવતુ અવતુ મામવતુ વક્તારમવતુ વક્તારમ્ ॥

ૐ પુરુષસૂક્તાર્થનિર્ણયં વ્યાખ્યાસ્યામઃ
પુરુષસંહિતાયાં પુરુષસૂક્તાર્થઃ સંગ્રહેણ પ્રોચ્યતે ।
સહસ્રશીર્ષેત્યત્ર સશબ્દોઽનન્તવાચકઃ ।
અનન્તયોજનં પ્રાહ દશાઙ્ગુલવચસ્તથા ॥ ૧॥

તસ્ય પ્રથમયા વિષ્ણોર્દેશતો વ્યાપ્તિરીરિતા ।
દ્વિતીયયા ચાસ્ય વિષ્ણોઃ કાલતો વ્યાપ્તિરુચ્યતે ॥ ૨॥

વિષ્ણોર્મોક્ષપ્રદત્વં ચ કથિતં તુ તૃતીયયા ।
એતાવાનિતિ મન્ત્રેણ વૈભવં કથિતં હરેઃ ॥ ૩॥

એતેનૈવ ચ મન્ત્રેણ ચતુર્વ્યૂહો વિભાષિતઃ ।
ત્રિપાદિત્યનયા પ્રોક્તમનિરુદ્ધસ્ય વૈભવમ્ ॥ ૪॥

તસ્માદ્વિરાડિત્યનયા પાદનારાયણાદ્ધરેઃ ।
પ્રકૃતેઃ પુરુષસ્યાપિ સમુત્પત્તિઃ પ્રદર્શિતા ॥ ૫॥

યત્પુરુષેણેત્યનયા સૃષ્ટિયજ્ઞઃ સમીરિતઃ ।
સપ્તાસ્યાસન્પરિધયઃ સમિધશ્ચ સમીરિતાઃ ॥ ૬॥

તં યજ્ઞમિતિ મન્ત્રેણ સૃષ્ટિયજ્ઞઃ સમીરિતઃ ।

અનેનૈવ ચ મન્ત્રેણ મોક્ષશ્ચ સમુદીરિતઃ ॥ ૭॥

તસ્માદિતિ ચ મન્ત્રેણ જગત્સૃષ્ટિઃ સમીરિતા ।
વેદાહમિતિ મન્ત્રાભ્યાં વૈભવં કથિતં હરેઃ ॥ ૮॥

યજ્ઞેનેત્યુપસંહારઃ સૃષ્ટેર્મોક્ષસ્ય ચેરિતઃ ।
ય એવમેતજ્જાનાતિ સ હિ મુક્તો ભવેદિતિ ॥ ૯॥ ૧॥

અથ તથા મુદ્ગલોપનિષદિ પુરુષસૂક્તસ્ય વૈભવં
વિસ્તરેણ પ્રતિપાદિતમ્ । વાસુદેવ ઇન્દ્રાય ભગવજ્જ્ઞાનમુપદિશ્ય
પુનરપિ સૂક્ષ્મશ્રવણાય પ્રણતાયેન્દ્રાય પરમરહસ્યભૂતં
પુરુષસૂક્તાભ્યાં ખણ્ડદ્વયાભ્યામુપાદિશત્ ।
દ્વૌ ખણ્ડાવુચ્યેતે । યોઽય મુક્તઃ સ પુરુષો
નામરૂપજ્ઞાનાગોચરં સંસારિણામતિદુર્જ્ઞેયં
વિષયં વિહાય ક્લેશાદિભિઃ સંક્લિષ્ટદેવાદિજિહીર્ષયા
સહસ્રકલાવયવકલ્યાણં દૃષ્ટમાત્રેણ મોક્ષદં
વેષમાદદે । તેન વેષેણ ભૂમ્યાદિલોકં વ્યાપ્યાનન્ત-
યોજનમત્યતિષ્ઠત્ । પુરુષો નારાયણો ભૂતં ભવ્યં
ભવિષ્યચ્ચાસીત્ । સ ચ સર્વસ્માન્મહિમ્નો જ્યાયાન્ ।
તસ્માન્ન કોઽપિ જ્યાયાન્ । મહાપુરુષ આત્માનં
ચતુર્ધા કૃત્વા ત્રિપાદેન પરમે વ્યોમ્નિ ચાસીત્ । ઇતરેણ
ચતુર્થેનાનિરુદ્ધનારાયણેન વિશ્વાન્યાસન્ । સ ચ
પાદનારાયણો જગત્સ્રષ્ટું પ્રકૃતિમજનયત્ । સ
સમૃદ્ધકાયઃ સન્સૃષ્ટિકર્મ ન જજ્ઞિવાન્ ।
સોઽનિરુદ્ધનારાયણસ્તસ્મૈ સૃષ્ટિમુપાદિશત્ ।
બ્રહ્મંસ્તવેન્દ્રિયાણિ યાજકાનિ ધ્યાત્વા કોશભૂતં
દૃઢં ગ્રન્થિકલેવરં હવિર્ધ્યાત્વા માં હવિર્ભુજં
ધ્યાત્વા વસન્તકાલમાજ્યં ધ્યાત્વા ગ્રીષ્મમિધ્મં
ધ્યાત્વા શરદૃતું રસં ધ્યાત્વૈવમગ્નૌ હુત્વાઙ્ગ-
સ્પર્શાત્કલેવરો વજ્રં હીષ્યતે । તતઃ સ્વકાર્યાન્સર્વ-
પ્રાણિજીવાન્સૃષ્ટ્વા પશ્ચાદ્યાઃ પ્રાદુર્ભવિષ્યન્તિ ।
તતઃ સ્થાવરજઙ્ગમાત્મકં જગદ્ભવિષ્યતિ । એતેન
જીવાત્મનોર્યોગેન મોક્ષપ્રકારશ્ચ કથિત ઇત્યનુસન્ધેયમ્ ।
ય ઇમં સૃષ્ટિયજ્ઞં જાનાતિ મોક્ષપ્રકારં ચ

સર્વમાયુરેતિ ॥ ૨॥

એકો દેવો બહુધા નિવિષ્ટ અજાયમાનો બહુધા વિજાયતે ।
તમેતમગ્નિરિત્યધ્વર્યવ ઉપાસતે । યજુરિત્યેષ હીદં
સર્વં યુનક્તિ । સામેતિ છન્દોગાઃ । એતસ્મિન્હીદં સર્વં
પ્રતિષ્ઠિતમ્ । વિષમિતિ સર્પાઃ । સર્પ ઇતિ સર્પવિદઃ ।
ઊર્ગિતિ દેવાઃ । રયિરિતિ મનુષ્યાઃ । માયેત્યસુરાઃ ।
સ્વધેતિ પિતરઃ । દેવજન ઇતિ દેવજનવિદઃ । રૂપમિતિ ગન્ધર્વાઃ ।
ગન્ધર્વ ઇતિ અપ્સરસઃ । તં યથાયથોપાસતે તથૈવ ભવતિ ।
તસ્માદ્બ્રાહ્મણઃ પુરુષરૂપં પરંબ્રહ્મૈવાહમિતિ
ભાવયેત્ । તદ્રૂપો ભવતિ । ય એવં વેદ ॥ ૩॥

તદ્બ્રહ્મ તાપત્રયાતીતં ષટ્કોશવિનિર્મુક્તં ષડૂર્મિવર્જિતં
પઞ્ચકોશાતીતં ષડ્ભાવવિકારશૂન્યમેવમાદિ-
સર્વવિલક્ષણં ભવતિ । તાપત્રયં ત્વાધ્યાત્મિકાધિભૌતિ-
કાધિદૈવિકં કર્તૃકર્મકાર્યજ્ઞાતૃજ્ઞાનજ્ઞેય-
ભોક્તૃભોગભોગ્યમિતિ ત્રિવિધમ્ । ત્વઙ્માંસશોણિતાસ્થિ-
સ્નાયુમજ્જાઃ ષટ્કોશાઃ । કામક્રોધલોભમોહમદ-
માત્સર્યમિત્યરિષડ્વર્ગઃ । અન્નમયપ્રાણમયમનોમય-
વિજ્ઞાનમયાનન્દમયા ઇતિ પઞ્ચકોશાઃ ।
પ્રિયાત્મજનનવર્ધનપરિણામક્ષયનાશાઃ ષડ્ભાવાઃ ।
અશનાયાપિપાસાશોકમોહજરામરણાનીતિ ષડૂર્મયઃ ।
કુલગોત્રજાતિવર્ણાશ્રમરૂપાણિ ષડ્ ભ્રમાઃ ।
એતદ્યોગેન પરમપુરુષો જીવો ભવતિ નાન્યઃ ।
ય એતદુપનિષદં નિત્યમધીતે સોઽગ્નિપૂતો ભવતિ । સ વાયુપૂતો
ભવતિ । સ આદિત્યપૂતો ભવતિ । અરોગી ભવતિ । શ્રીમાંશ્ચ ભવતિ ।
પુત્રપૌત્રાદિભિઃ સમૃદ્ધો ભવતિ । વિદ્વાંશ્ચ ભવતિ ।
મહાપાતકાત્પૂતો ભવતિ । સુરાપાનાત્પૂતો ભવતિ ।
અગમ્યાગમનાત્પૂતો ભવતિ । માતૃગમનાત્પૂતો ભવતિ ।
દુહિતૃસ્નુષાભિગમનાત્પૂતો ભવતિ । સ્વર્ણસ્તેયાત્પૂતો ભવતિ ।
વેદિજન્મહાનાત્પૂતો ભવતિ । ગુરોરશુશ્રૂષણાત્પૂતો ભવતિ ।
અયાજ્યયાજનાત્પૂતો ભવતિ । અભક્ષ્યભક્ષણાત્પૂતો ભવતિ ।
ઉગ્રપ્રતિગ્રહાત્પૂતો ભવતિ । પરદારગમનાત્પૂતો ભવતિ ।

કામક્રોધલોભમોહેર્ષ્યાદિભિરબાધિતો ભવતિ । સર્વેભ્યઃ
પાપેભ્યો મુક્તો ભવતિ । ઇહ જન્મનિ પુરુષો ભવતિ તસ્માદેત-
ત્પુરુષસૂક્તાર્થમતિરહસ્યં રાજગુહ્યં દેવગુહ્યં ગુહ્યાદપિ
ગુહ્યતરં નાદીક્ષિતાયોપદિશેત્ ।
નાનૂચાનાય । નાયજ્ઞશીલાય । નાવૈષ્ણવાય ।
નાયોગિને । ન બહુભાષિણે । નાપ્રિયવાદિને ।
નાસંવત્સરવેદિને । નાતુષ્ટાય । નાનધીતવેદાયોપદિશેત્ ।
ગુરુરપ્યેવંવિચ્છુચૌ દેશે પુણ્યનક્ષત્રે
પ્રાણાનાયમ્ય પુરુષં ધ્યાયન્નુપસન્નાય
શિષ્યાય દક્ષિણકર્ણે પુરુષસૂક્તાર્થમુપદિશેદ્વિદ્વાન્ ।
ન બહુશો વદેત્ । યાતયામો ભવતિ । અસકૃત્કર્ણમુપદિશેત્ ।
એતત્કુર્વાણોऽધ્યેતાધ્યાપકશ્ચ ઇહ જન્મનિ પુરુષો
ભવતીત્યુપનિષત્ ॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ પ્રતિષ્ઠિત-
માવિરાવીર્મ એધિ ॥ વેદસ્ય મ આણીસ્થઃ શ્રુતં મે મા
પ્રહાસીરનેનાધીતેનાહોરાત્રાન્સન્દધામ્યૃતં વદિષ્યામિ
સત્યં વદિષ્યામિ ॥ તન્મામવતુ તદ્વક્તારમવતુ અવતુ
મામવતુ વક્તારમવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ મુદ્ગલોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*MudgalaUpanishad*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*